योगवासिष्ठः/प्रकरणम् १ (वैराग्यप्रकरणम्)/सर्गः ०४

अज्ञातलेखकः

श्रीवाल्मीकिरुवाच ।

रामः पुष्पाञ्जलिव्रातैर्विकीर्णः पुरवासिभिः ।

प्रविवेश गृहं श्रीमाञ्जयन्तो विष्टपं यथा ।। १

प्रणनामाथ पितरं वसिष्ठं भ्रातृबान्धवान् ।

ब्राह्मणान्कुलवृद्धांश्च राघवः प्रथमागतः ।। २

सुहृद्भिर्भ्रातृभिश्चैव पित्रा द्विजगणेन च ।

मुहुरालिङ्गिताचारो राघवो न ममौ मुदा ।।।

तस्मिन्गृहे दाशरथेः प्रियप्रकथनैर्मिथः ।

जुघूर्णुर्मधुरैराशा मृदुवंशस्तनैरिव ।। । ४

बभूवाथ दिनान्यष्टौ रामागमन उत्सवः ।

सुखं मत्तजनोन्मुक्तकलकोलाहलाकुलः ।। ५

उवास स सुखं गेहे ततः प्रभृति राघवः ।

वर्णयन्विविधाकारान्देशाचारानितस्ततः ।। ६

प्रातरुत्थाय रामोऽसौ कृत्वा संध्यां यथाविधि। ।

सभासंस्थं ददर्शेन्द्रसमं स्वपितरं तथा ।। ७

कथाभिः सुविचित्राभिः स वसिष्ठादिभिः सह ।

स्थित्वा दिनचतुर्भागं ज्ञानगर्भाभिरादृतः ।। ८

जगाम पित्रानुज्ञातो महत्या सेनयावृतः ।

वराहमहिषाकीर्णं वनमाखेटकेच्छया ।। ९

तत आगत्य सदने कृत्वा स्नानादिकं क्रमम् ।

समित्रबान्धवो भुक्त्वा निनाय ससुहृन्निशाम् ।। १०

एवंप्रायदिनाचारो भ्रातृभ्यां सह राघवः ।

आगत्य तीर्थयात्रायाः समुवास पितुर्गृहे ।। ११

नृपतिसंव्यवहारमनोज्ञया

सुजनचेतसि चन्द्रिकयानया ।

परिनिनाय दिनानि स चेष्टया

स्तुतसुधारसपेशलयाऽनघ ।। १२

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये वैराग्यप्रकरणे दिवसव्यवहारनिरूपणं नाम चतुर्थः सर्गः ।। ४ ।।